# सुशिष्यः उपमन्युः

*व्यासदेवविरचितात् महाभारतम् इति आर्षग्रन्थात् इदं कथावस्तु आनीतम् । प्राचीनकालात् प्रचलितः गुरुशिष्ययोः संबन्धः अद्यापि अनुसरणीयः । ''आज्ञा गुरूणामविचारणीया'' इति नीतिरत्र प्रदर्शिता । गुरुभक्तेः शिष्यस्य निष्ठयाः च सुफलमस्यां कथायामनुभूयते ।*

आसीत् धौम्यस्य ऋषेः उपमन्युर्नाम शिष्यः । उपाध्यायस्तं गोरक्षणाय प्रेषयति स्म । स उपाध्यायवचनाद् दिवा गाः रक्षित्वा दिवसक्षये उपाध्यायस्याग्रतः स्थित्वा नमश्चकार ।

गुरुस्तं हृष्टपुष्टं दृष्ट्वा उवाच – ''वत्स ! केन वृत्तिं करोषि ?''

उपमन्युः गुरुं प्रत्यवादीत् – ''भैक्ष्येण वृत्तिं करोमि ।''

तमुपाध्यायः प्रत्युवाच – ''मह्यमनिवेद्य भैक्ष्यं त्वया न भोक्तव्यम् ।''

ततः उपमन्युः 'तथा' इत्युक्त्वा गुरवे सर्वं भैक्ष्यं न्यवेदयत् । उपाध्यायः तस्मादेव सर्वं भैक्ष्यमगृह्णात् ।

अथाऽन्येद्युः सः अहनि गाः रक्षित्वा निशामुखे गुरोः पुरतः स्थित्वा नमश्चकार । तमुपाध्यायः तथापि हृष्टपुष्टं दृष्ट्वा उवाच –''केन इदानीं वृत्तिं करोषि ?'' उपमन्युः उपाध्यायं प्रत्यभाषत ''भवते पूर्वं भैक्ष्यं निवेद्य अपरं चरामि । तेन वृत्तिं करोमि ।''

तं गुरुः प्रत्यवदत् – ''नैतत् न्याय्यम्, एतेन अन्येषां भैक्ष्योपजीविनां वृत्त्युपरोधं करोषि । एवं न कर्त्तव्यम् ।''

अथ उपमन्युः वृत्त्यर्थं यान् यानुपायान् अकरोत्, गुरुस्तं सर्वेभ्यः न्यवारयत् । एवं प्रतिषिद्धः स कदाचिदरण्ये क्षुधार्त्तः भ्रमन् अर्कपत्राण्यभक्षयत् । तैः भक्षितैः दृष्टिहीनः संजातः । ततः स गच्छन् एकस्मिन् कूपे अपतत् ।

अथ तस्मिन् अनागते सूर्ये च अस्तं गते गुरुः अन्यान् शिष्यानवदत् । – ''मया सर्वतः प्रतिषिद्धः स नियतं कुपितः नागच्छति । तस्मात् सोऽन्विष्यताम्'' इत्युक्त्वा शिष्यैः सार्द्धमरण्यं गत्वा तम् आहूतवान् – 'भो ! उपमन्यो ! कुत्रासि ? वत्स ! एहीति ।''

स उपाध्यायस्य वचनं श्रुत्वा प्रत्युवाच – ''अस्मिन् कूपे पतितोऽहम् ।''

उपाध्यायस्तम् अपृच्छत् ''कथं त्वमस्मिन् कूपे पतितोऽसि ?''

स प्रत्यभाषत –''अर्कपत्राणि भक्षयित्वा नयनाभ्यामन्धः सन् भ्रमन् अस्मिन् कूपे पतितोऽहम् ।

तमुपाध्यायः प्रत्युवाच ''वत्स !अश्विनीकुमारौ प्रार्थयस्व, तौ देवभिषजौ त्वां चक्षुष्मन्तं करिष्यतः ।''

गुरुणा एवमुक्तः स अश्विनीकुमारौ स्तुतवान् ।अथ तस्य स्तुत्या प्रसन्नौ अश्वनीकुमारौ तत्र उपस्थाय उपमन्युं प्राहतुः –

''वत्स ! इममपूपं भक्षय ।''

उपमन्युः अवदत् ''गुरवे अनिवेद्य इममपूपं न भक्षयिष्यामि ।''

अथ अश्विनीकुमारौ आहतुः ''वत्स ! आवां ते अनया गुरुभक्त्या अतीव प्रीतौ स्वः ।चक्षुष्मान् भव ।श्रेयस्ते भविष्यति, यशस्वी भव ।''

ततः उपमन्युः लब्धचक्षुः उपाध्यायं निकषा आगत्य प्राणमत् सर्वमवदच्च ।उपाध्यायः तस्मिन् प्रीतिमान् भूत्वा अवदत् – ''वत्स ! अश्विनीकुमारौ यथा आहतुः तथा ते श्रेयो भविष्यति, सर्वे वेदाः सर्वाणि धर्मशास्त्राणि ते प्रतिभास्यन्ति ।त्वमेव सर्वशास्त्रज्ञः भविष्यसि ।''

उपाध्यायवचनात् उपमन्युः तथैव अभवत् । अतः साधूक्तम्-गुरुभक्त्या किं न सिध्यति ?

**( महाभारतम् )**

## टिप्पणी :

उपाध्यायः – ଗୁରୁ, ଶିକ୍ଷକ । दिवसक्षये – ସନ୍ଧ୍ୟା ସମୟରେ । नमश्चकार – ନମସ୍କାର କଲେ । भैक्ष्यम् – ଭିକ୍ଷାଲବ୍ଧ (ସଂଗୃହୀତ) ଦ୍ରବ୍ୟ । निवेद्य – ଜଣାଇ, ଦେଇ । अनिवेद्य – ନ ଜଣାଇ, ନଦେଇ । भैक्ष्योपजीवी – ଭିକ୍ଷାଲବ୍ଧ ଦ୍ରବ୍ୟରେ ଜୀବିକା ନିର୍ବାହ କରୁଥିବା ବ୍ୟକ୍ତି । वृत्ति – ଜୀବିକା ।वृत्त्युपरोधम् – ବୃତ୍ତିର ବାଧା ।अर्कपत्राणि – ଅରଖଗଛର ପତ୍ରସବୁ ।प्रतिषिद्धः – ନିବାରିତ । नियतम् – ନିଶ୍ଚୟ । अपूपम् – ପିଷ୍ଟକ, ପିଠା । श्रेयः – ମଙ୍ଗଳ । लब्धचक्षुः – ଚକ୍ଷୁଲାଭ କରି। आहतुः – ଦୁହେଁ କହିଲେ ।प्रतिभास्यन्ति – ପ୍ରତିଭାତ ହେବ ।

## अभ्यास :

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) उपमन्युः कथं गुरवे सर्वं भैक्ष्यं न्यवेदयत् ?

(ख) ''नैतत् न्याय्यम्'' इति गुरोः कथनस्य कः अभिप्रायः ?

(ग) उपमन्युः कथं दृष्टिहीनः सन् कूपे अपतत् ?

(घ) केन भावेन उपमन्युः चक्षुर्द्वयं प्राप्तवान्?

(ङ) प्रीतिमान् उपाध्यायः उपमन्युं किम् अवदत् ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) उपमन्योः गुरोर्नाम किम् ?

(ख) उपाध्यायः गोररक्षणाय कं प्रेषयति स्म ?

(ग) उपमन्युः केन वृत्तिं करोति स्म ?

(घ) सायम् उपमन्युः कुत्र स्थित्वा नमस्करोति स्म ?

(ङ) भैक्ष्येण केषां वृत्त्युपरोधं करोषि इति गुरुः प्रत्यवदत् ?

(च) क्षुधार्त्तः उपमन्युः कानि अभक्षयत् ?

(छ) उपमन्युः गच्छन् कुत्र अपतत् ?

(ज) कैः सार्द्धम् उपाध्यायः वनमगच्छत् ?

(झ) उपमन्युः कौ प्रार्थयति स्म ?

(ञ) कौ देवभिषजौ स्तः ?

(ट) किं साधूक्तम् ?

**3. बन्धनीमध्यात् रेखांकितपदस्य कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत।**

(क) गुरुः तं हृष्टपुष्टं दृष्ट्वा उवाच । (कर्त्तरि प्रथमा, उक्ते कर्मणि प्रथमा, अव्यययोगे प्रथमा)

(ख) गुरवे सर्व भैक्ष्यं न्यवेदयत् । (निवेदनार्थे चतुर्थी, निमित्तार्थे चतुर्थी, सम्पद्यमाने चतुर्थी ।)

(ग) गुरुस्तं सर्वेभ्यः न्यवारयत् ।

(वारणार्थानामीप्सितः इति पञ्चमी, अपादाने पञ्चमी, निवृत्त्यर्थे पञ्चमी)

(घ) वत्स! इममपूपं भक्षय । (कर्त्तरि प्रथमा, सम्बोधने प्रथमा, अव्यययोगे प्रथमा)

(ङ) श्रेयः ते भविष्यति । (सम्बन्धे षष्ठी, कृत्योगे षष्ठी, अनादरे षष्ठी)

(च) तस्मात् <u>सः</u> अन्विष्यताम् । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(छ) <u>नयनाभ्याम्</u> अन्धः सन् भ्रमन् अस्मिन् कूपे पतितोऽहम् ।

(अङ्गविकारे तृतीया, सहार्थे तृतीया, ऊनार्थे तृतीया)

(ज) तौ देवभिषजौ त्वां <u>चक्षुष्मन्तं</u> करिष्यतः ।

(कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया, अत्यन्तसंयोगे द्वितीया)

**4. वाक्यरचनां कुरुत ।**

पुरतः, कर्त्तव्यम्, सर्वतः, भ्रमन्, सार्धम्, कुत्र, श्रुत्वा, त्वाम्, अतीव, निकषा ।

**5. सन्धिं कुरुत ।**

उपाध्यायः + तम् , प्रति + अवादीत् , वृत्ति + उपरोधम् , कदाचित् + अरण्ये , यान् + उपायान् , शिष्यान् + अवदत् , नि + अवारयत् , कुत्र + असि, सार्द्धम् + अरण्यम्, प्र + आहतुः, पतितः + असि , तथा + एव , साधु + उक्तम् ,

**6. सन्धिविच्छेदं कुरुत ।**

उपाध्यायस्याग्रतः, नमश्चकार, तस्मादेव, भैक्ष्यमगृह्णात्, नैतत्, गुरुस्तम्, नागच्छति, कदाचिदरण्ये, प्रत्युवाच, सर्वमवदत् , तमुपाध्यायः, प्रत्युवाच ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) गोरक्षणाय (गवां रक्षणं तस्मै, गोभ्यः रक्षणं तस्मै, गोषु रक्षणं तस्मै) ।

(ख) निशायाः मुखं तस्मिन् (निशामुखौ, निशामुखे, निशामुखेन ) ।

(ग) लब्धचक्षुः (अव्ययीभावः, बहुव्रीहिः, तत्पुरुषः ) ।

(घ) क्षुधार्त्तः (क्षुधया ऋतः, क्षुधाम् आर्त्तः, क्षुधायाः आर्तः) ।

(ङ) गुरौ भक्तिः तया (गुरुभक्तेः गुरुभक्तिम्, गुरुभक्त्या) ।

(च) दिवसक्षये (कर्मधारयः, अव्ययीभावः, षष्ठीतत्पुरुषः) ।

(छ) भैक्ष्योपजीविनाम् (भैक्ष्येण उपजीवन्ति ये तेषाम्, भैक्ष्येण जीवन्ति इति तेषाम्, भैक्ष्येण उपजीवति यः तस्य) ।

(ज) दृष्ट्या हीनः (दृष्टिहीनेन, दृष्टिहीनः दृष्टिहीने) ।

(झ) हृष्टपुष्टम् (बहुव्रीहिः, कर्मधारयः, अव्ययीभावः) ।

(ञ) वृत्त्युपरोधम् (वृत्तेः उपरोधः तम्, वृत्तये उपरोधः तम्, वृत्तौ उपरोधःतम्) ।

(ट) धर्मस्य शास्त्राणि (धर्मशास्त्राणाम्, धर्मशास्त्राणि, धर्मशास्त्रेषु ) ।

(ठ) वृत्त्यर्थम् (अव्ययीभावः, कर्मधारयः, नित्यसमासः) ।

(ड) अर्कपत्राणि (अर्कवृक्षस्य पत्राणि, अर्कस्य पत्राणि, अर्कनामवृक्षस्य पत्राणि) ।

(ढ) उपाध्यायस्य वचनं तस्मात् (उपाध्यायवचनात्, उपाध्यायवचनम्, उपाध्यायवचनानि)

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) वृत्तिम् = ________ + क्तिन् । (वृध्, वृत्, वृ )

(ख) प्रतिषिद्धः = प्रति + सिध् + ________ । (क्त, क्तिन्, क्तवतु)

(ग) कुपितः = ________ + क्त । (कुप् , कु, कुक्)

(घ) उपस्थाय = उप + स्था + ________ । (ल्यप् , शतृ, शानच्)

(ङ) लब्धः = ________ + क्त । (लुभ् , लभ् , लूञ् )

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

उपाध्याय, गुरु, शिष्य, वत्स, भ्रमत्, चक्षुष्मत्, यशस्विन् ।

■